Srikantha Sivacharya

Vedanta sutra saiva bhasya – Chapter-1 - 2nd part

वेदांत सूत्र शैव भाष्य - प्रथम अध्याय-2 पाद:

Sanskrit-

Paper – Handwritten

1946 Sambat (129 years old)

20 Folio

11.8" x 6"

Complete

अथवेदांतसूत्रशैवभाष्यस्यप्रथमाध्यायस्य
द्वितीयपादारंभः॥ ॥पत्रसंख्या २०

श्रीकंठीय
शैवभाष्यं
१

श्रीगणेशाय नमः श्रीमत्सद्गुरुशंकरेंद्रचरणद्वंद्वं प्रणम्यादरात् श्रीमद्विश्वपतिं च ढुंढिगण
यं ध्यात्वानल्ल० पूर्णा॰षिका श्रीमद्व्यासनिरूपितोत्तममहासूत्रोपभाष्योत्तमं श्रीकंठीयमहं लि
खाम्यतितरामस्त्वीश्वरे मद्भूतिः १ अथ वेदांतसूत्रशैवभाष्यस्य प्रथमाध्यायस्य द्वितीयपादा
रंभः॥ ॥श्रीरस्तु ॐ ब्रह्मबोधकानां वेदांतवाक्यानामानंत्यात्प्रतिवाक्यं विचारानुपपत्तेः स
दिग्धानां केषांचिद्विचारेण तन्न्यायेन तादृशानामपि निर्णयो भवतीति कतिचिद्वेदवाक्यानि
तात्पर्यलिंगसमन्वयेन ब्रह्मबोधकानि समन्वितानि १; तेषु कानिचित्स्पष्टब्रह्मलिंगानि प्रथम
पादे विचारितानि० कानिचिदस्पष्टलिंगानि द्वितीयपादे विचार्यंते॥ ॥सर्वत्रप्रसिद्धो ३
पदेशात् १ छांदोग्ये श्रूयते॰ सविषयः ।=मनोमयः प्राणशरीरो भारूपः सत्यसंकल्प आ
काशात्मा सर्वकर्मा सर्वकाम ७ इत्यादि॰ अत्र=मनोमय ७ इत्यादिवाक्यधर्मकः अप्रमाणः ७ रूपः

१ वाक्यानि समन्वितानि ब्रह्मबोधकानि तात्पर्यलिंगसमन्वयेन इति पा० २ मनोमयत्वादि इति पा०॥ ३
पूर्वः पक्ष इति सर्वत्र पा०॥ ४ तस्य प्रसक्तत्वात् इति क्वचित् पा०॥

परमेश्वरो वा जीवो वेति संशयः । जीव इति पूर्वपक्षः २ कुतः तस्य सर्वप्रत्यासन्नत्वात् ४ ॥ अथ
खलु क्रतुमयः पुरुषो यथाक्रतुरस्मिंल्लोके पुरुषो भवति । तथेतः प्रेत्य भवति । स क्रतुं कुर्वी
त ० इति कर्मवशादिह परत्र च परिभ्रमन् जीवः प्रस्तुतः पूर्वं । तदनंतरं ॥ मनोमयः ॥ इति श्रू
यते । अत एव मनोमयत्वादिधर्मको जीवः । मनोमयत्वप्राणशरीरत्वादिकं संसारिलक्षणं न
परमेश्वरलिंगं । सतिपयार्थे । संकल्प इति सत्यसंकल्पत्वमपि संसारिधर्मत्वेन योजनीयं ।
अतः सर्वथा मनोमयत्वादिधर्मको जीव एव न परमेश्वरः । इति प्राप्ते ब्रूमः । परमेश्वर एव म
नोमयत्वादिधर्मकः । कुतः । परब्रह्मणः परमेश्वरस्यैवोपक्रमे ॥ सर्वं खल्विदं ब्रह्म । तज्ज
लानिति शांत उपासीत ० इति सर्वकारणस्योपास्यत्वेनोपदेशात् । श्रुतितात्पर्यं च । तत्
ज्जलानिरं सर्वं च ॥ ब्रह्माधीनजन्मस्थितिध्वंसकत्वेन तत्सर्वं चिदचिद्रूपं ब्रह्म । खलु

श्रीकंठीय इति ॥ शांत उपासीत ब्रह्म ॥ इति ॥ यथा सागरे संपन्नजन्मस्थितिविलयं तु बुद्बुदफेनादिकं तद्
शैवभाष्य· रूपमेव दृश्यते । तथा शक्तिमति ब्रह्मणि संपन्नजन्मादिकं तन्मयत्वेन तद्व्यतिरेके किंचन नो
२ पलभ्यते ॥ तथाथर्वशिरसि निरूपितमीश्वरेण ॥ अहमेकः प्रथममासं वर्तामि च भविष्या
मि च । नान्यः कश्चिन्मत्तो व्यतिरिक्त ॥ इति ॥ ततश्च तेन ॥ ब्रह्माहं ॥ इत्यादिना विश्वरूपतमा
त्मनः प्रपंचितं ॥ तत्राविश्वरूपत्वे ॥ सोऽन्तरादन्तरं प्राविशत् ॥ इत्यनुप्रवेशस्य हेतुकत्वं ॥ अ
तो ब्रह्मणोऽपृथक्सिद्धजन्मस्थितिप्रलयनिकत्वादस्य जगतस्तद्व्यतिरिक्तता नास्ति ॥ तथा
भियुक्ता वदंति ॥ ॥ शक्तरूपोऽस्य जगतः कृत्स्नं शक्तिमांस्तु महेश्वरः । शक्तिस्तु शक्तिमद्रूपा २
द्व्यतिरेकं न गच्छति ॥ तादात्म्यमनयोर्नित्यं वह्निदाहकयोरिव ॥ शक्तिशक्तिमतोर्यस्मा
दभेदः सर्वदा स्थितः ॥ अतस्तद्धर्मधर्मित्वात्परा शक्तिः परात्मनः ॥ न वह्नेर्दाहिका शक्ति

१ मेतद्विश्वं पतन्नत्वतः सर्वं विश्वं ब्रह्म इति पा० ॥ २ णोऽपृथक्सिद्धिस्थिति इति पा० ३ वांछतीति पा० ॥

व्यतिरिक्ता विभासते ॥ ६ ॥ इत्यादि ॥ वायुसंहितायां च ॥ शान्त्यादि चतुष्टयं अनंतं शिवतत्त्वं सम्भ-
वं ॥ तेनैकेन तु न स्यात्मा मंत्र दात्कुंभादिकं यथा ॥ परेण २ विविधा शक्तिः प्रबोधानंदरूपिणी ॥ ए
कानेकस्वरूपेण भाति भानोरिव प्रभा ॥ ८ ॥ परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानब
लक्रिया च ॥ एको रुद्रो न द्वितीयाय तस्थुर्य इमाल्लोकानीशत ईशनीभिः ॥ ७ ॥ जननीभिः प
रमशक्तिभिः ॥ इत्यादयश्च परब्रह्मणः स्वाभाविकानंतजगज्जननशासनपालनशक्तिम
त्वं श्रुतयो वदंति ॥ किं बहुना श्रुतिस्मृतीतिहासपुराणाभियुक्तिसूक्तिप्रामाण्यात् सकल-
चिदचित्प्रपंचमहाविभूतिरूपा महासच्चिदानंदसत्तास्वतंत्रा च देशकालादिपरिच्छेदशू-
न्या स्वाभाविकी परमशक्तिः परब्रह्मणः शिवस्य स्वरूपं च गुणश्च भवति ॥ तद्व्यतिरेकेण १
परब्रह्मणः सर्वज्ञत्वसर्वशक्तित्वसर्वकारणत्वसर्वनियंतृत्वसर्वोपास्यत्वसर्वानुग्राहकत्व

श्रीकंठीय सर्वज्ञत्वार्थहेतुत्वादिकं सर्वगतत्वं च न संभवति॥ ॥किंच॥ महेश्वरमहादेवरुद्रादि
शैवभाष्ये परमाख्यानामभिधेयत्वं च न संभवति॥ ॥तथा च ५ सर्वविदचित्प्रपंचशरीरविशिष्टं
२ ब्रह्म सर्वशब्दवाच्यं॥ यथा नीलशब्दो न केवलं स्वस्यैव वाचकः। किंतु तद्विशिष्टस्योत्पलस्या
पि तथा प्रपंचशब्दोऽपि ब्रह्मणः॥ तस्मात् सर्वशब्दवाच्यत्वं ब्रह्मणः॥ सर्वो वै रुद्रः॥ इत्यादि
य उपपादयति ६ ततः॥ सर्वं खल्विदं ब्रह्म॥ इति सर्वविदचित्प्रपंचशरीरकं ब्रह्माभिधीय
ते॥ ततो ब्रह्मरूपत्वात् प्रपंचस्य हेयाद्युपपत्त्याच्छांत एव ब्रह्मोपासीनेति। एतमर्थं श्रीपरा-
शरो भगवानभिव्यनक्ति॥ २ विग्रहं देवदेवस्य जगदेतच्चराचरं। एतमर्थं न जानंति पश- २
वः पाशगौरवात्॥ विद्येति चेतनां प्राहुरविद्यामचेतनां। विद्याविद्यात्मकं सर्वं विश्वं विश्व
गुरोर्विभोः॥ रूपमस्य न संदेहो विश्वं तस्य वशे यतः। सत्यसाधो च सच्छब्दः सन्निरोधक उच्यते॥

१ वायवीय- इति पा० । परास्य इति पा० । ३ महारूपा इति पा० । ४ रेके इति पा० । ५ यथा इति पा० । ६ ख्य-
प्रतिपा- इति पा० ॥

विपरीते त्वसच्छब्दः कथ्यते वेदवादिभिः। सच्चासच्च जगद्धि स्वशरीरं परमेष्ठिनः॥ वृक्षस्य मू
लसेकेन शाखाः पुष्यंति वै यथा। शिवस्य पूजया तद्वत्पुष्यत्यस्य वपुर्जगत्॥ आत्मा तस्या
ष्टमो मूर्तिः शिवस्य परमात्मनः। व्यापिकेतरमूर्तीनां विश्वं तस्माच्छिवात्मकं॥ देहिनो यस्य
कस्यापि निग्रहः क्रियते यदि। अनिष्टमष्टमूर्तेस्तत्तत्र कार्या विचारणा॥ सर्वोपकारकरणं स
र्वानुग्रहणं तथा। सर्वाभयप्रदानं च शिवस्याराधनं विदुः॥ इत्यादिकाः। अतः सर्वाकारत्वा
द्ब्रह्मणः। सर्वं ब्रह्म॥ इति १ शांत उपासित॥ इति समंजसमेवं। तस्मादुपास्यत्वे ३ भोपक्रम
गतं ब्रह्मैव मनोमयत्वादिधर्मकं। न ४ मनोमयत्वादिकं संसारिणो लक्षणं। उपास्याकारपरिग्र
हाद्दस्य परिच्छेदसंभवात्। यदुक्तं। ५ क्रतुमयस्य जीवस्य प्रसुतत्वान्मनोमयो जीव॥ इति। तद
युक्तं। उत्पत्तिशिष्टब्रह्मावरुद्धायामुपासनायामवांतरप्राप्तस्य जीवस्य प्रवेशायोगात्। मशकात्मा

१ एतत्सर्वं इति पा०। २ व्यंजयति इति पा०। ३ ततो हि सममुपास्यत्वे इति पा०। ४ नच इति पा०। ५ प्र
वेषु इति पा०॥

श्रीकंठीय तः यथाबिम्बे देवावेशः छायायामामिक्षायां वा जिनानां प्रवेशः ॥ अतो ब्रह्मैव मनोमयत्वादिध
शैवभाष्यं र्मवत्वेनोपास्यमिति ॥१॥ ॥उपक्रमगतं ब्रह्मैव मनोमयत्वादिविशिष्टमित्युक्ते ऽवांतर
८ सिद्धस्य जीवस्य प्रसंगोऽनर्थकः स्यादित्याशंकायामाह ॥ ॥विवक्षितगुणोपपत्तेश्च
॥ ॥सत्यसंकल्पस्य कामनादीनां विवक्षितानां गुणानां ब्रह्मण्येवोपपन्नत्वेन तदेवोपास्यं
अवांतरसिद्धस्य जीवस्योपासकत्वेन न तदा कोऽप्युपयोग इति ॥२॥ ॥इह सामान्येन जीवस्यो
पास्यत्वं नास्ति । किंतूपासकत्वमिति निरूपितं पुनरपि सकलजीवसमष्टिरूपहिरण्यगर्भो
पादानभूतस्य नारायणस्यापि विश्वाधिकस्य विषयमुपास्यत्वं नास्तीत्यभिधातुमिदमधिक ७
रणमारभ्यते ॥ ॥अनुपपत्तेस्तु न शारीरः ३ अस्य महोपनिषदि श्रूयते । विश्वकः ।
पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतं नारायणं महाज्ञेयं ॥ इत्यादि ॥ अत्र विश्वपति

१ मुपासकत्वं नोपास्यत्वमित्यभिधातु- इति पा० ॥ २ देविधेय- इति पा० ॥

त्वादिलक्षणयुक्ततयानारायणशुव्द्याख्यो मूर्त्यात्मा परमेश्वरो ऽन्यो वेति संदेहः ॥ सह
स्रशीर्षं देवं ॥ इत्यारभ्य सहस्रशीर्षत्वादिविधेयत्वेन नारायणमूर्त्यात्मन एवोद्देश्यत्वे
नाभ्यासात ॥ समुद्रं तं विश्वशंभुवं ॥ इति समुद्रशायित्वादिनदिनेगाच्च तत्पर्यायवाच
कात्मेन हरिशब्दादिप्रयोगाच्च नारायण एव मूर्त्यात्मा विश्वपतित्वादिना लिंगेन प्रतिपा
द्य इति पूर्वः पक्षः ॥ सिद्धांतस्तु नारायणात्मा परमेश्वर इति ॥ कुतः ॥ विश्वपतित्वादेर्नां परमे
श्वरधर्माणां नरद्रर्थीतेरनारायणेऽनुपपत्तेः ॥ पशूनां पतये ब्रह्माणां पतये जगतां पतये
॥ इत्यादिना परमेश्वर एवं निखिलभुवनाधिपत्यमभ्यस्यते ॥ एको रुद्रो न द्वितीयाय तस्थु
र्य इमांल्लोकानीशत ईशनीभिः ॥ इति रुद्रव्यतिरिक्तस्य जगदीश्वरत्वं निषिध्यते ॥ विश्वा
धिको रुद्रः ॥ इति विश्वाधिकत्वं च तस्यैवाभ्युपेतेः ॥ अतो विश्वपतित्वादिलक्षणो नारायणात्मा

श्रीकंठीय परमेश्वर इति हृदयं॥ तदयमर्थः॥ नारायणं परं ब्रह्म इति नारायणस्य परब्रह्मभावमुक्त्वा॥
शेषभाष्ये॰ पद्मकोशप्रतीकाशं॥ इत्यादिना पुरुषस्य हृदयपुंडरीकस्थानमुक्त्वा तस्य मध्ये॥ वह्निशि
५ खा॰ इत्यादिना जीवस्वरूपमुक्त्वा तस्याः शिखाया मध्ये परमात्मा व्यवस्थित इति परमात्मत्वे
न जीवांतर्यामित्वेनोपास्यत्वमवगम्यते॥ स ब्रह्मा स शिव॰॥ इत्यादिना तद्विभूतित्वं ब्रह्म
शिवादीनामुच्यते॥ अतो नारायण एव विश्वपतिः परब्रह्मभूतो जीवांतर्यामित्वेनोपास्य इ
ति॥ तदात्मकत्वेन तदधिकृतत्वेन तदुपास्यत्वं च परमेश्वरस्य वक्तुमयुक्तमित्यत आह॥ ॥
कर्मकर्तृव्यपदेशात्॥ ४॥ ॥ कर्मत्वं कर्तृत्वं च व्यपदिश्यते॰ तत्र ध्यातृध्येययोः परमे ५
श्वरनारायणयोः॥ कथं॥ पद्मकोशप्रतीकाशं॥ इति प्रकृतस्य नारायणस्यैव स्वरूपमुच्यते॥
॥परमात्मा व्यवस्थित॥ इति परमेश्वर एव परमात्मा न तदंतर्वर्तीति न ध्येयत्वेनोच्यते॥ ततो॰

१ मस्मार– इति पा॰

ध्यातृत्वेन नारायणस्य ध्येयत्वेन परमेश्वरस्य कर्तृत्वं कर्मत्वं चाऽपदिश्यते: अतो नारा
यणाद्न्य एवोपास्य: परमात्मा॥ स ब्रह्मा स शिव॥ इत्यादिना ब्रह्मविष्णुरुद्रेंद्रादिप्रपंचवि
भूतिविशिष्टत्वं परमेश्वरस्योपदिश्यते॥ अत्र विष्णोरग्रहणोऽपि कैवल्योपनिषदि स्मृयते॥
हृत्पुंडरीकं विरजं॥ इत्यादिना हृदयपुंडरीकं प्रस्तुत्य॥ उमासहायं परमेश्वरं प्रभुं त्रिलोच
नं नीलकंठं प्रशांतं। ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमस: परस्तात्॥ स ब्रह्मा
स शिव: सेंद्र: सोऽक्षर: परम: स्वराट्। स एव विष्णु: स प्राण: स कालोऽग्नि:॥ इत्यादि॥ तन्मा
यो॥ त्राध्याहार्य:॥ यो वै रुद्र: स भगवान् भूर्भुव: स्वर्यश्च ब्रह्मा तस्मै वै नमो नम:॥ यश्च विष्णु
यश्च महेश्वर॥ इत्याद्यथर्वश्रुतिरपि द्रष्टव्या॥ अत्र विभूतित्वेन ब्रह्मशिवयोर्मध्ये विष्णोरग्र
हणं परमेश्वरोपासकतया तस्य प्रस्तुतत्वादित्यविरोध:॥४॥ ॥सहस्रशीर्षा पुरुष॥

श्रीकंठीय
शैवभाष्यं
६

इत्यारभ्य प्रस्तुतस्य पुरुषस्य ॥ पादोऽस्य विश्वा भूतानि ॥ इति निर्जेकांशजगदादिशिष्टत्वमुच्य
ते ॥ सहस्रशीर्षं देवं ॥ इति स एवात्र नारायण इति वोध्यते ॥ १ स चायं ॥ नारायणं परं ब्र
ह्म ॥ इति ब्रह्मत्वेनोच्यते ॥ ब्रह्मैव हि सर्वोपास्यं कथमस्य तथाभूतस्यान्यं प्रत्युपासकत्व
मित्यत आह ॥ ॥ शब्दविशेषात् ५ ॥ ॥ नारायणं परं ब्रह्म ॥ इति शब्दविशेष
एव नारायणात् परमिति ब्रह्म प्रतिपादयति ॥ अतो नारायणादन्यदेव परं ब्रह्मोपास्यं
परब्रह्मणः सहस्रशीर्षत्वादिविशिष्टपुरुषरूपेण जगदुपादानत्वात् परब्रह्मात्मकस्य
तस्य जगदाकारत्वमिति वक्ष्यामः ॥ प्रकृतिश्च ॥ इत्यधिकरणे ॥ ५ ॥ ॥ नारायण ६
स्योपासकत्वे प्रमाणांतरमाह ॥ ॥ स्मृतेश्च ६ ॥ ॥ एवमुक्त्वा ततो राजन् १ म
हायोगेश्वरो हरिः दर्शयामास पार्थाय परमं रूपमैश्वरं ॥ इति स्मृतेश्च महायोगस्वामिनो

१ स्माध्यते इ निम॰

नारायणस्य परमेश्वरविषयो योगः समाधिरभिव्यज्यते ॥ अत्र ॥ अहं यथा वदाराध्यः
क्लेशेनाक्लिष्टकर्मणा । तस्माद्दिष्टतमः क्लेशादन्यो मम न विद्यते ॥ ॥ इति ॥ आश्व-
त्थामानं प्रति परमेश्वरवचनं च ॥ तस्मादस्मन्नारायणादुपास्यं परं ब्रह्म ॥ ६ ॥ ॥
पुनरनुपपत्तिमाशंक्याह ॥ ॥ अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्य-
त्वादेवं व्योमवच्च ७ ॥ ॥ नीवारशूकवत्तन्वी पीता भास्वत्यणूपमा । तस्याः शिखा-
या मध्ये सो परमात्मा व्यवस्थितः ८ ॥ इति स्वल्पवह्निशिखान्तर्वर्तितया स्वल्पाश्र-
यत्वादल्पव्यपदेशाच्चायं व्यापी न परमेश्वर इति चेत् न उपास्यत्वात् तथा व्यपदेशः
न स्वरूपात्मत्वात् व्योममहत्ववत् स्वरूपमहत्वस्य सिद्धत्वात् यथा घटादिषूपाहितस्य

व्योम्नेस्तदुपाधिवशादल्पत्वंस्वरूपेतेमहत्वंचः ततोनविरोधः ७ पुनराशंकापरिहरति॥
॥संभोगप्राप्तिरितिचेन्नवैशेष्यात् ८॥ ॥यदुक्तं १ = नारायणपरंब्रह्म॥ इतिनारा
यणात्परंतद्रूपास्यंब्रह्मः नदेवाहि॥ ऋतंसत्यंपरंब्रह्मपुरुषंकृष्णपिंगलं ऊर्ध्वरेतंविरू
पाक्षं ४ इत्युच्यते २ तत्र ३ परमशक्तिमायाशबलाकारतयाकृष्णपिंगलः कृशानुरे
तस्कतयावोर्ध्वरेतस्कं त्रिलोचनतयाविरूपाक्षं। परिपूर्वोक्तदहरपुंडरीकेशेतइतिपुरुषं
।ऋतसत्यंमनोवाग्विपर्यासरहितंपरंब्रह्मइतिपरलक्षणं। अतोऽस्यत्रिलोचनत्वादिल
क्षणशरीरसंबंधात्कारणानसुखादिसंभोगप्राप्तिरितिचेन्नः वैशेष्याः तः सुखदुःख ७
भोगहेतुभ्योजीवशरीरेभ्योब्रह्मरूपस्यास्तिहिवैशेष्यंः इच्छागृहीतत्वादस्य। तेषांकर्म
मूलत्वाच्च ः अतएवश्रूयतेपरमेश्वरः ३ अपहतपाप्माविरजाविमृत्युर्विशोकोविजघ

१ महानाहर इतिपा०॥

त्सोऽपिपासः सत्यकामः सत्यसंकल्पः ॥ इति संसारिशरीरधर्मरहितत्वेन ॥ नचैवं संसारी जी
वः ॥ अतएवाप्राकृतानि पापजरामरणशोकादिरहितानि ४ स्वेच्छासंपादितानि लीलामं
गलरूपाणि परमेश्वरस्य ॥ स्थिरैरंगैः पुरुरूपउग्र ॥ इत्यादिप्रसिद्धाणि नित्यानि विज्ञापं
ने ॥ अतः परब्रह्मणः परमेश्वरस्य जीवादेहिशिष्यान्नतद्वच्छरीरादिगतदोषापत्तिः ॥ अत्रख
१ लूपक्रमादिभिर्लिंगैर्विरूपासंब्रह्म सर्वोत्कृष्टमुपास्यमिति प्रक्रमेव ॥ तथाहि ॥ उपक्रमे ॥ अ
णोरणीयान् ॥ इत्यादिना ॥ महिमानमीशं ॥ इत्यंतेन ॥ सकलजंतुहृदयगुहावर्तित्वेन स्व
प्रसादातिशयवीतशोकपुरुषदर्शनविषयत्वेन महिमातिशयवानीशः प्रस्तुतः ॥ पुनः ॥ संत
प्राणाः प्रभवंति तस्मात ॥ इत्यादिना सएव परमशक्तिमान प्राणादिजगदुपादानत्वेन निरू
पितः ॥ तथा च उपोद्देवानां प्रथमं पुरस्ताद्विश्वाधिको रुद्रो महर्षिः हिरण्यगर्भं पश्यत जायमानं ॥

१ उक्तं हि इति पा० ॥ २ इत्यवगम्यत इति पा० ॥ ३ तस्त्र इति पा० ॥ ४ ॥ पापजरामरणादिशून्यानि इति पा० ॥

श्रीकंठभा
शैवभाष्य
८

इतिविश्वाधिकत्वेनसर्वज्ञत्वेनसकलकार्यप्रथमहिरण्यगर्भजनकत्वेनचनिमित्तभूतःपरा
म्हष्टः सएवततः ॥ परेणनाकं ॥ इतिपराकाशगुहावर्तीत्युक्तः ॥ अफलकर्मानुष्ठायिनांवेदान्त
तात्पर्यवेदिनांयतीनांजितेंद्रियाणां ॥ परामृतात् परिमुच्यंति ॥ इतिपरामृतरूपतयाप्राप्य
त्वेनवर्णितः ॥ १३ ॥ कस्तस्यामात्रुपापइतिप्राप्ते ॥ दहरंविपापं ॥ इतिदहरोपासनमारब्धं ॥ अत्र
तस्मिन्यदंतस्तदुपासितव्यं ॥ इतिदहरपुंडरीकेयद्वस्तुतदुपास्यमितिसामान्येनोक्तं ॥ तत्
किमित्याकांक्षायां ॥ यःपरःसमहेश्वरः ॥ इतिमहेश्वरत्वेनतदुपवर्णितं ॥ उपास्यंतत्किं
रूपमित्याकांक्षायां ॥ ऋतंसत्यं ॥ इत्यादिनाविरूपाक्षत्वादिलक्षणरूपमित्युपसंहृतं ॥ तत्रा ८
वांतरवाक्यसिद्धोनारायणः पूर्वाधिकरणन्यायादुपासकत्वेनासिद्धः ॥ अत्रसर्वेषामुपासने
अधिकारस्यसंभावेपिनारायणः अनावरणग्रहणात् ॥ ग्रहणस्याधिकारार्थः तदिहोपा

स्येन विश्वास्येण ब्रह्मणानंदरूपात्मकस्य नारायणस्याभेदभावनया तद्धर्मैरस्य प्रतिपादनमुपा-
दानस्य तदात्मन इति समीचीनं ॥ ८ ॥ ॥ यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः । मृत्युर्
यस्योपसेचनं । क इत्था वेद यत्र सः ॥ इति श्रुतेः । स्वविषयः । इह मृत्यूपसेचनामिलित ब्रह्म-
क्षत्रोपलक्षितनिखिलचिदचित्प्रपंचकवलीकृतया स्वरूपमात्रेणः परमेश्वरेऽन्यावेतिसं-
शयः । परमकारुणिकस्य सर्वानुग्राहकस्य सकलभक्षकत्वमनुचितं ॥ हिंसारूपं हि परमा-
णाविमोचनं ॥ हिंसाप्रवृत्तेः क्रोध एव मूलांकुरः । क्रोधस्यामंगलगुणस्य मोह एव मूलकंदः ।
तस्य सर्वसंहार १ निदानस्य तम एव प्रकृतिः ऽन्यतस्तामसः सर्वसंहर्ता । तामसत्वं नामा-
वृतं ज्ञानादिमलान्निष्प्रकाशत्वं । सर्वसंहर्तृत्वे च हेतुत्वेन तस्य नित्यशुद्धस्य निरस्ताधिके मंगा-
लाकरस्य निःसंसारकलंकस्याज्ञानतमो मोहक्रोधादिकामंगलगुणसंसर्गप्रसंगः ॥ २

स्वरूपलक्षणतया निर्णीतं सर्वज्ञत्वं नित्यत्वमतादिकमनर्थमेव स्यात् ॥ तस्माद्ब्रह्मणोऽन्य
एतादृशगुणः संहर्ता भवतीति पूर्वः पक्षः ॥ सिद्धांतस्तु ब्रह्मैव सर्वसंहर्तृत्वेनाम्नायते ॥ कुतः ॥
चराचरग्रहणात् ॥ यदुक्तं ॥ निखिलचराचरप्रपंचभोक्तृत्वमयुक्तं ॥ इति ॥ तदेव ब्रह्मत्वेलक्ष
णोपरिच्छिन्नशक्तेर्जीवस्य सकलचराचरसंहरणसामर्थ्याभावात् ॥ तस्मादुपसंहर्त्रे ४
महाग्रासाय वै नमः ॥ इति परमेश्वरस्याथर्वशिरसि स्मर्यते सर्वसंहर्तृभावो ॥ न कश्चिज्जीव
स्यः ॥ यदिमा विश्वा भुवनानि जुह्वत् ॥ इति ब्रह्मणो निजप्रकाशवन्हौ निखिलभुवनहव्य
होतृत्वमवगम्यते ॥ न चैवमस्मिन् जीवस्य सामर्थ्यं हव्यकोटिनिविष्टस्य ॥ स्वेतरमखिलं च ९
राचरं चिदचित्प्रपंचं स्वात्मनि संहृत्य पदावर्तते परमेश्वरस्तदा सर्वमिदं निरस्तचंद्रसूर्या
दिप्रकाशतया विध्वस्तरात्रिंदिनादिकालविभागमपगतनामरूपविशेषतया स्थूलसूक्ष्म

१ संसार इति पा० ॥ २ निरवधिक इति पा० ॥ ३ संकरमसंगः इति पा० ॥ ४ इषसंहर्त्रे इति पा० ॥

देवमनुष्यादिव्यवहारशून्यंतमोमात्रंवर्त्तते। सएकएवपरमेश्वरोनिरंकुशप्रकाशः सर्वसाक्षी
तदानीमपिपरिशिष्यते: तथाहिश्रुतिः ।।यदातमस्तन्नदिवानरात्रिर्नसन् नचासंच्छिवए
वकेवलः।। इति ३ श्रुत्वा।। नसन्नचासन्।। इतिसदसतोः पशुपाशयोर्नसत्त्वसत्तानिषिध्यते:
किंतुनामरूपविभागार्हस्थूलत्वं।। ।।ननुनित्यप्रकाशेशिवेपरब्रह्मणिसत्यपिकथंतमोम
यंजगदितिचेत्: नः स्वयंप्रकाशस्यसर्वसाक्षिणःशिवस्यकाहानिः: नामरूपशक्त्यतयाप्रद्
र्णायोग्येषुविषयेषुविहतकरणशरीरशक्तीनांजीवानांप्रपंचग्रहणंनास्ति: मलतिरोहितस्व
ज्ञानकरणतयाशिवस्यस्वप्रकाशरूपस्यापिपूर्वमिवदर्शनाभावान्निरस्त समस्तकार्यवि
शेषज्ञानापरमसुषुप्तिमयोमहावस्थानमद्भुतमुच्यते: तथाहिस्मृतिः: ((आसीदिदंतमोभू
तमप्रज्ञातमलक्षणं।। ।।इतिः नामरूपविभागानर्हसूक्ष्मचिदचिन्मयपंचशक्तिविशिष्टतया

श्रीकंठीय शिवः केवल इत्युच्यते ॥ स एव सर्गकाले स्वसंकल्पमात्रेण समवायिकारणनिरपेक्षमेव स्व
शैवभाष्यं स्मात्प्रथमशक्तिपरिस्फुरणपूर्वकं तत्तन्नामविशिष्टमेव स्थूलं विश्ववैचित्र्यजातं सृजति
१० प्रकाशयति ॥ तथाभियुक्तसूक्तिः ॥ चिदात्मैव हि देवोऽन्तःस्थितमिच्छावशाद्बहिः ॥ योगी
व निरुपादानमर्थजातं प्रकाशयेत् ॥ ॥ इति ननु ॥ मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्व
रं ॥ ॥ तस्माद्धिराउजायत ॥ इत्यादिश्रुत्या मायायाः स्वरूपोपादानत्वं श्रूयते ॥ कथं निरुपादान
त्वमिति चेत् ॥ सत्यं ॥ यथा घटनिर्माणे कुलालस्य स्वशरीरपृथक्त्वेन मृत्पिंड उपादानं दृश्यते
॥ तथा न परमेश्वरात्पृथक्सिद्धं मायायामुपादानं ॥ मायादिरूपात्परमेश्वराज्जगदुत्पत्तेः ॥ अ १०
तो न विरोधः ॥ न तत्त्व ॥ इदं पृथगवस्थानं सूक्ष्ममायारूपः परमेश्वरस्य मुपादानमयोत्युच्य
ते ॥ तथा पर्वशिखायां ॥ ॥ ध्यायीतेशानं प्रध्यापितं सर्वमिदं ब्रह्म ॥ विष्णुरुद्रेंद्रास्ते संप्रसू

यंतेसर्गाणिचेंद्रियाणिसहभूतैर्नैकारणंकारणानांधाताध्याताकारणंतुध्येयः सर्वैश्वर्यसंप
न्नः सर्वेश्वरः शंभुराकाशमध्यगः॥ इतिश्रुतेः॥ ततः सर्वभूतानांयत्रसंहारस्ततएवसर्वेषा
मुत्पत्तिरिति। अनंतानांतेषांयावत्संहृतिस्तावत् तत्रैवानंतशक्तौशिवेस्थितिः॥ इतिसर्व
संहर्ताशिवएवब्रह्मशब्दाभिधेयः॥ यदुक्तं॥ संहारस्यहिसारूप्यात् तन्मूलक्रोधाघन
र्थगुणसंबंधोब्रह्मणोभवेत्॥ इति। तद्विचारविलासः॥ क्रोधादिमूलस्यतमोगुणस्यप्रा
कृतधर्मत्वात्॥ उमासहायंपरमेश्वरंप्रभुं॥ इत्यारभ्य॥ समस्तसाक्षिंतमसःपरस्तात्॥
इतिश्रुतेरेवभगवतोप्रमाणं॥ परमेश्वरस्यतमसःपरत्वेनपौराणिकोभणितिरपिपरमे-
श्वरेमोहादिनिवर्तकानांज्ञानादीनांनित्यसंबंधमाह॥ ज्ञानंविरागमैश्वर्यंतपः सत्यंक्षमा
धृतिः। स्रष्टृत्वमात्मसंबोधोह्यधिष्ठातृत्वमेवच॥ अव्ययानिदशैतानिनित्यंतिष्ठंतिशंकरे-

॥ ॥इति॥ अशेषविषयामोघशुद्धिविजृंभणः। आत्मशक्त्यमृतास्वादप्रमोदरसिको युवा॥ अनंतानंदसंदोहमकरंदमधुव्रतः। औदार्यवीर्यगांभीर्यमाधुर्यमकरालयः॥ अखंडजगदंडानां पिंडीकरणपंडितः। इत्यादि च॥ असंकुचितविभवः परमेश्वरो हि सिसृक्षुः॥ सोऽकामयत बहु स्यां॥ इति बहुप्रपंचभावनायात्मनो मायालक्षणामिच्छारूपां शक्तिमाश्रयति॥ स तपोऽतप्यत॥ इति तपःस्वरूपिकतया ज्ञानात्मिकया शक्त्या सकलजीवकर्मानुगुणान् तच्छरीरसामग्रीमालोचयति॥ आलोच्य च संकलितसकलकरणविशेषया क्रियाशक्त्येदं सर्वमसृजत

इतीच्छाशक्तिभिन्नो निखिलजगच्चित्रमुन्मीलयति॥ तत्सृष्ट्वा तदेवानुप्राविशत्॥ इति ९१

सकलकार्यजातमनुप्रविश्य शक्तित्रयसंबंधेन त्रिगुणाभिन्नमूर्तित्रयादिप्रपंचरूपो भवति॥ नहि हरसर्वशक्तेः सर्वज्ञस्य शिवस्य महिमा केन विज्ञायते॥ अतः सर्वसंहर्ता परमेश्वर इति॥ ८॥

१ जगदुत्पन्नत्वाविरोधः इति पा०॥ २ ततः स्व— इति पा० ३ शानंतब्रह्मत इति पा०॥ ४ —नाध्याता इति पा०॥

॥ ॥प्रकरणानि १०॥ ॥महांतं विभुमात्मानं मत्वा धीरो न शोचति॥ नायमात्मा प्रव
चनेन लभ्य॥ इति परमेश्वरस्यैव प्रकरणं॥ अतश्च परब्रह्मपरमेश्वरः सर्वसंहर्ता नान्य इति सि
द्धं॥१०॥ ॥इहाधिकरणे सर्वसंहर्तृत्वलक्षणेन सिद्धस्य परमेश्वरस्य॥ द्वा सुपर्णा॥ इत्या
दिना प्रसिद्धस्य विभूतिर्जीवसाहचर्यमभिव्यंजयितुमधिकरणारंभः॥ ॥गुहां प्रविष्टावा
त्मानौ हि तद्दर्शनात् ११॥ ॥ऋतं पिबंतौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्द्धे। छाया
तपौ ब्रह्मविदो वदंति पंचाग्नयो ये च त्रिणाचिकेताः॥ ॥इति श्रूयते। स्या विषयः इह सुकृत
स्य ने परार्द्धे ब्राह्मणादिशरीरे हृदयगुहां प्रविष्टौ कर्मफलभोक्तारौ छायातपाविव विलक्ष
णौ कौचिदुच्यते। तावेतौ बुद्धिजीवौ जीवपरमेश्वरौ वेति संदेहः। बुद्धिजीवावेवेतौ। कुतः॥ ऋ
तं पिबंतौ॥ इति भोक्तृत्वावगमात्। परमेश्वरस्य न भोक्तृत्वं॥ अनश्नन्नन्योऽभिचाकशीति॥

१-स्वरूपतया ज्ञानस्य प्रवृत्तिपा०॥

इतिदर्शनात् ॥ बुद्धिजीवयोर्भोक्तृत्वंप्रसिद्धमेव ॥ किंचजीवेश्वरयोश्चेतनरूपयोश्छाया
तपवदतीववैलक्षण्यंनास्ति ॥ बुद्धेरचेतनत्वादस्तिजीवाद्वैषम्यं ॥ तदेवंबुद्धिजीवाविति
प्राप्तेब्रूमः ॥ जीवपरमेश्वरावेवगुहागतौ ॥ तयोरेव ॥ तंदुर्दर्शंगूढमनुप्रविष्टंगुहाहितं
गह्वरेष्ठंपुराणं ॥ इतिगुहाप्रवेशादर्शनात् ॥ यदुक्तं ॥ ईश्वरस्यनभोक्तृत्वं ॥ इति ॥ तदपिन
युज्यते ॥ प्राणारामंमनआनंदं ॥ इतिब्रह्मणः प्रात्मारामस्यमनोमात्रविषयस्वरूपा-
नंदभोगदर्शनात् ॥ तथाऽरण्ये च ॥ आत्मशाकमतास्वादप्रमोदरसिकोप्यवा ॥ अनंत
परमानंदमकरंदमधुव्रतः ॥ ॥ इत्यादि ॥ जीवस्यस्वकर्मफलभोक्तृत्वंप्रसिद्धं ॥ एवंचतयो ९२
र्भोगस्यसाधारण्यात्वेनाप्यवयोः ॥ पितत्राविशेषः समाश्रीयते ॥ भोक्त्रोविशेषात् ॥ यथाराजभृ
त्यावन्नभुंजते ॥ इत्यत्रनतद्वचिनात्वविशेषः ॥ यदुक्तं ॥ तयोर्नवैषम्यमिति ॥ तन्न ॥ यतो ॥

नित्यो नित्यानां चेतनश्चेतनानां ॥ इत्यादिश्रुत्या नित्यत्वचेतनत्वादिना जीवेश्वरयोः साम्ये
ऽपि वैषम्यमनादिमलसंबंधभावाभ्यां संभवति ॥ ज्ञाज्ञौ द्वावजावीशानीशौ ॥ इत्यादिश्रु
त्या ज्ञत्वाज्ञत्वस्वातंत्र्यादिधर्मवैषम्यं चावगम्यते ॥ ॥ ननु कथमेतयोः शरीरसंबंधे स
माने ऽपि कस्यचिदज्ञत्वादिकानर्थसंबंधः । कस्यचिदनर्थाभावः । इति चेन्न । सुखदुःखा-
योर्नैकाश्रयत्वं प्रयोजकं । किंतु स्वातंत्र्यास्वातंत्र्यमेव । तथा हि श्रुतिः ॥ समाने वृक्षे पुरुषो
निमग्नो ऽनीशया शोचति मुह्यमानः । जुष्टं यदा पश्यत्यन्यमीशं तदास्य महिमानमेति वीतशो
कः ॥ इति । अस्याः सांप्रदायिको ऽर्थः । जीवो ऽयमनादिना कर्मनिगडेन बद्धस्तत्तत्फलभो-
गानुगुणां गुहामायामयबहुकलेवरप्रविष्टो दुर्वारतापसंघातमनुभवन्ननीशया पारवश्ये
न तद्दुर्योहितमकुशलमेव मुह्यमानः शोचति । महामोहजलधिमग्नः । शोकमनुभवन्नतु

श्रीकंठीय वर्तते ; २ स्वभेदकतया स्वजुष्टं सर्वानुग्राहकमीशमुमासहितं पदा ? नरस्य प्रसादेन पश्यति ।
शैवभाष्यं अपरोक्षेण जानाति । तदास्य महिमानं निरतिशयानंदमपरागतशोकः प्राप्नोति ; अतः
१३ स्वतंत्रस्य शिवस्यानादिमुक्तस्य शरीरसंबंधेऽपि जीववत्तत्कृतदोषाप्राप्तिः ; तस्माज्जीव
परमेश्वरौ गुहांगतौ ॥ ११ ॥ ॥ पुनरुपपत्तिमाह ॥ ॥ विशेषणाच्च ॥ १२ ॥ ॥
किंच ; जीवपरमेश्वरावस्मिन्प्रकरणे विशेष्येते ; न जायते म्रियते वा विपश्चित् ; इत्यादि
ना जीवः ; अणोरणीयान्महतो महीयान् ॥ इत्यादिना परमेश्वरः ; एतद्विशेषणं जी
वद्वयपक्षे कथं न संभवतीति ; ततो जीवपरमेश्वरावेव गुहां प्रविश्य प्रेरकभावेनास्थितावि १३
ति निर्णयः ॥ १२ ॥ ॥ हृदयगुहांतर्वर्तितयोपास्यपरमेश्वरस्येहाद्युपासनस्थानांतरमु
च्यते ॥ ॥ अंतर उपपत्तेः ॥ १३ ॥ ॥ छांदोग्ये श्रूयते ; स्वाविषयः ; य एषोऽक्षिणि पुरु

१ स्वस्वोपायफलानुगुण — इति पा० ॥ २ महामोहनिर्बंधनशोकजलधिमग्नो वर्तते ; इति पा० ॥ ३ हृदयगु
हागतस्योपास्यतया परमेश्वरस्य पुनरिहो — इति पा० ॥

यो दृश्यते॰ एष आत्मेति होवाच॰ एतदमृतमभयं॰ एतद्ब्रह्म॥ इत्यादिः॰ इहामृतत्वादिलक्षणो॰
ऽस्यांतः श्रूयमाणः पुरुष ईश्वरो वान्यो वेति संशये परमेश्वर एवान्य इति वदामः॥ परमेश्वरस्य॥ द
हरं विपाप्मं पद्मकोशप्रतीकाशं॥ इत्यादिषु हृदयपुंडरीक एव संनिधानश्रवणात्॥ जीवस्य
तु रूपादिग्रहणे चक्षुरिंद्रियप्रवेशोऽस्ति॰ मनःसंबंधात्॥ स एवाक्षिपुरुषः॥ अयथवाक्षापापु
रूप इति नामेनिरूपणामः॥ परमेश्वर एवाक्ष्यंतःपुरुष इति॥ निरुपाधिकामृतत्वाभयत्वादी
नामस्मिन्नेवोपपत्तेः॥१३॥ ॥यदुक्तं॥ अक्ष्यंतःस्थितिरीश्वरस्य न श्रुता॥ इति॥ तत्राह॥
॥ ॥स्थानादिव्यपदेशाच्च॥१४॥ ॥यश्चक्षुषि तिष्ठन्॥ यश्चक्षुषोंऽतरः॥ यं चक्षुर्न वेद॥
यस्य चक्षुः शरीरं॥ यश्चक्षुषोंऽतरो यमयति॥ एष त आत्मांतर्याम्यमृतः॥ इत्यादिश्रुत्या च
क्षुःस्थितिनियमनादिकमीश्वरस्यापि यदिश्यते॥ अतः पर एवायमीश्वरः॥ २॥१४॥ ॥

श्रीकंठोप
शैवभाष्यं
१४

सुखविशिष्टाभिधानादेव च १२ कंब्रह्म खंब्रह्म इति पूर्वमस्य सुखविशिष्टताभिधानां
देवायमीश्वरः नहि छायापुरुषे सुखसंभवः ॥१४॥ यदुक्तं अक्षिपुरुषस्य जीवरूपत्वं तत्राह
॥ ॥अत एव स ब्रह्म १६ यत एव भवभयभीतापापकोशलाय ब्रह्मजिज्ञासवे कंब्रह्म
खंब्रह्म इत्युपक्रम्योपदिष्टं यद्ब्रह्म तदेवत्वं यदेव खं तदेव कमिति अत एव खश
ब्दाभिधेय आकाशः परमेव ब्रह्म किमीदृशोपपत्तिरस्ति जीवस्य नहि जीवे निरतिश
यसुखसंभवः ॥१६॥ ॥अतो यदेव पूर्वमपरिच्छिन्नसुखरूपतया प्राक्कथितं ब्रह्म तदेवा
क्ष्याधारत्वेनाप्रतिपाद्यत इत्यक्ष्यन्तःपुरुषः परमेश्वर इति पूर्वपक्षे पुनरियमनुपपत्तिरित्या १४
ह ३ ॥ ॥श्रुतोपनिषत्कगत्यभिधानाच्च १७ ॥ ॥श्रुतब्रह्मस्वरूपाणामधिगतव्या
या आर्चिरादिगतेरक्षिपुरुषं श्रुतवतो ऽर्चिषमेवाभिसंभवन्त्यर्चिषोहर इत्यादि तत्तु

रुषो ऽमानवः स एतान् ब्रह्म गमयति। एष देवपथो ब्रह्मपथः एतेन प्रतिपद्यमाना इमं मान
वमावर्तं नावर्तन्ते॥ इत्येतेनाभिधानान्नासौ जीवश्छायापुरुषो वा किं त्वीश्वर एव॥१७॥
॥ — ॥१ छायापुरुषत्वं इति पा०॥ शंकरमतेऽएतत् सूत्रं न भवति। २ यद्वा वक्तं तदे
वक्ष्यामिति पा०॥ ३ परमेव ब्रह्म॥ तच्छायापुरुषे किमीदृशोपपत्तिरस्ति जीवस्य वा॥१६॥ अ
नोऽस्यंतः पुरुष ईश्वर इति जीवपक्षे परमियमनुपपत्तिरित्याह इति पा०॥ ४ श्रुतवतेऽर्चिष-
मभिसंभवंतीत्यादिनाभिधानान्नासौ जीवः। ईश्वर इति वरं पा०॥ ॥अनवस्थितेरसंभ
वाच्च नेतरः॥१८॥ ॥अस्य महोपनिषदि श्रूयते विषयः॥ अंगुष्ठमात्रः पुरुषोऽङ्गुष्ठं चैव
समाश्रितः॥ ईशः सर्वस्य जगतः प्रभुः प्रीणाति विश्वभुक्॥ ॥इत्यादिः इहांगुष्ठमात्रत्वादिवि
शिष्टः परमेश्वरो वान्यो वेति संशयः॥ प्राणाग्निहोत्रप्रकरणादंगुष्ठमात्र इत्यल्पत्वव्यपदेशा

श्रीकंठीय
शैवभाष्यं·
१५

इयंप्राणानामप्युरेवपंचानामाहुतीनांभोक्तावगम्यते ॥ नचास्यभोक्तृत्वानुपपत्तिः ॥ ॥ अप
श्चपृथिवीचान्नमनाशेवह्निमारुतौ ॥ इत्यादिश्रुत्यायोरपिभोक्तृत्वप्रसिद्धेः सर्वेषामयंप्राण
वायुरितिपूर्वःपक्षः । परमेश्वरएवेतिसिद्धान्तः । सकलजगदीशत्वविश्वभुक्त्वादीनांधर्मा-
णामन्यत्राभिधानेऽनवस्थानादसंभवाच्च१ ॥ तत्रतेषामतईश्वरएवेतादृशः ॥ नचप्राण
रूपत्वेनाप्युपास्यत्वमुच्यते ॥ प्राणानांग्रेपिरसिरुद्धोमाविशांतक ॥ इतिप्राणधारत्वेनत
स्यश्रवणात् ॥ अंगुष्ठमात्रपरिमाणस्योपास्यत्वादित्यविरोधः । प्राणवायोर्भोक्तृत्वसिद्धाव
पिविश्वभोक्तृत्वंनसंभवति ॥ अतोऽयमीश्वरएवप्राणाग्निहोत्राराध्यत्वेनप्राणरूपःप्रतिपद्य १५
तइति ॥ १८ ॥ सर्वज्ञस्यसर्वेशात्केः सर्वानुग्राहकस्यविभोरपिशिवस्यपरब्रह्मणःसवितृमंडल
पुरुषहृदयपुंडरीकादिरूपासनायामस्थितिरूपयादिताः सर्वत्रतांप्रतिपादयितुमिदमधिकरणं२

१ यतोऽनवस्थास्यात् ॥ नदसंभवाच्च इतिपा० ॥ करणांतर इतिपा० ॥

मारभ्यते ॥ अंतर्यामि ब्रह्मणोऽस्य विषयः श्रूयते ॥ यः पृथिव्यां तिष्ठन् । यः पृथिव्या अंतरो । यं पृथि
वी न वेद यस्य पृथिवी शरीरं । यः पृथिवीमंतरो यमयति । स त आत्मांतर्याम्यमृत ॥ इत्येवं पृथि
वीमारभ्य प्रतिपर्यायमव्यक्तांतपर्यंतमखिलवस्त्वंतर्यामितया श्रूयमाणः परमेश्वरो जीवो वा
विराट्पुरुषो वा प्रधानं वेति संशयः । स्वोपार्जितविचित्रफलभोगाय सकलभूतेंद्रियानुप्रवेशो जी
वस्योपपद्यते ॥ सकलचेतनोपादानतया सर्वभूतानुप्रवेशो विराट्पुरुषस्य युक्तः ॥ अथवा मह
दादिरूपेण परिणतत्वात् प्रधानस्य सर्वव्यापकत्वमुचितः ॥ विश्वाधिको रुद्रः ॥ इति विश्वाधि
कत्वेन निखिलविकाराणामेतस्य विकारस्य प्रपंचानुप्रवेशो न घटते ॥ ततः परमेश्वरमंतरेण जी
वादिष्वेकतमः स्यादंतर्यामीति ॥ पूर्वपक्षे प्राप्ते ब्रूमः । पृथिव्याद्यंतर्यामितया श्रूयमाणः परमेश्व
र एव । सर्वांतरत्वादितद्धर्मव्यपदेशात् ॥ अथर्वशिरसि च ॥ सोंऽतरादंतरं प्राविशत् ॥ इति परमे

श्रीकंठीय श्वरस्यैव सर्वात्मतयानुप्रवेशाद्दर्शनात्॥ एष त आत्मांतर्याम्यमृतः॥ इति शिवस्यैवानादिमु
शैवभाष्यं क्तोऽमृत इत्युच्यते॥ एतानि वा अस्यामृतस्य नामधेयानि॥ इति श्रवणाच्च॥ यथा॥ विश्वाधिको
१६ रुद्रः॥ इति विश्वाधिकत्वं परमेश्वरस्य श्रूयते। तथा विश्वरूपत्वमपि॥ सर्वो वै रुद्रः॥ इत्यादिषु
सर्वविकारानुप्रवेशेऽपि तद्विकारस्य लेशोऽपि नास्तीति खलु प्रतिपर्यायममृतशब्दप्रयोगः॥
अथर्वशिरसि च॥ यो वै रुद्रः स भगवान् भूर्भुवः स्वः यश्च ब्रह्मा तस्मै वै नमो नमः॥ इत्यादिना रु-
ब्रह्मविष्णुरुद्रोमालक्ष्मीसरस्वतीगणेशस्कंदेंद्रादिलोकपालभूतादिग्रहलोकपृथिव्यादिपंच
भूतसर्वसोमग्रहनक्षत्रकालादिरूपेण प्रत्येकमेवमभ्यासतो निरूपिते परमैश्वर्यादिः॥ तत्रा १६
पि सकलचिदचिन्नानुप्रवेशादस्यापुरुषार्थसंबंधो भवेदिति शंकायां प्रतिपर्यायमैश्वर्या
दिमंगलगुणसंबंधाभिधायि भगवच्छब्दप्रयोगः कृतः॥ ततः सर्वाधिकः सर्वात्मा च शिवः॥

१ विद्यते इति पा॰॥ २ व्याकृतमस्यांतर्यामित्वमिति इति पा॰॥ इत्यादिरीत्या इति पा॰॥

रमेश्वर इतियुक्तमेव ॥१८॥ ॥ पक्षं किंतं यथा नारीनामंतर्यामित्वमुचितमिति ॰ नतपरि
हरति ॥ ॥ नचस्मार्तमतद्धर्माभिलापाच्छारीरश्च २०॥ ॥ नचस्मार्तंप्रधानमंत
र्यामीतिश्रुतं ॰ तस्याविकारत्वादृष्टत्वादिधर्मानभिलापात् ॰ नशारीरोविराड्रूपश्च ॰ तस्यसक
लनियामकत्वाद्यनुपपत्तेः ॥२०॥ ॥ जीवश्चनभवतीत्याह ॥ ॥ उभयेऽपिहिभेदेनैन
मधीयते २१॥ ॥ उभयेकाण्वमाध्यंदिनशाखिनश्च ॥ योविज्ञानेतिष्ठन् ॰ य आत्मनिति
ष्ठन् ॰ इत्यादिनाजीवादंतर्यामिणंभेदेनाधीयते ॰ ततः परमेश्वरस्यैवसकलांतर्यामित्वं ॰ नप्र
धानविराड्रूपजीवानामितिसिद्धं ॥२१॥ ॥ इहप्रत्यक्षपृथिव्यादिरूपत्वेनप्रतिपादितस्यपर
मेश्वरस्यतदृश्यत्वादिकं नास्तीतिप्रतिपादयितुमिदमधिकरणमवतार्यते ॥ ॥ अदृश्यत्वा
दिगुणकोधर्मोक्तेः २२॥ ॥ अथपरायया तदक्षरमधिगम्यते ॰॥ यत्तदद्रेश्यमग्राह्यमगो

शंकरमते शारीरश्चोभयेऽपिहिभेदेनैनमधीयत इत्याकारकमेकं सूत्रं विभावनीयं ॥

क्षमवर्णमचक्षुःश्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं तद्भूतयोनिं १ परिप
श्यन्ति धीराः इत्यादिश्रूयते २ तस्य विषयः। अन्त्राक्षरं २ प्रधानं जीवः परमेश्वरो वेति संदेहः। प्रधा
नमत्राक्षरं ३ तस्य ३ महदादिपरिणामिनो ४ भूतयोनित्वसंभवात् ५ अथवा जीवः ६ तस्य हि ७
अक्षरं प्रधानमक्षरात्परतः परः॥ इति श्रुतेरक्षरशब्दवाच्यत्वमुचितं। स्वकर्मवशेन ८ महाभूतयो
नित्वं च ९ अतस्तयोरन्यतरदक्षरमिति प्राप्ते ब्रूमः १० परमेश्वर एवाक्षरं ११ यः सर्वज्ञः सर्ववित्
यस्य ज्ञानमयं तपः। इत्यादिना तद्धर्मोक्तेः १२ न हि परमेश्वरादन्यस्मिन् सर्वज्ञत्वादिकं संभवति। य
दुक्तं १३ भूतयोनित्वं जीवप्रधानयोः संभवति। इति। तदयुक्तं १४ तयोरचेतनासर्वज्ञयोस्तत्साम १७
र्थ्याभावात् १५ पुनरपि जीवप्रधानयोरनुपपत्तिमाह॥ ॥ विशेषणभेदव्यपदेशाभ्यां च ने
तरौ २३॥ ॥ अत्रैकविज्ञानेन सर्वविज्ञानं प्रतिज्ञायते। कस्मिन्नु भगवो विज्ञाते सर्व-

१ मूर्धोत्यादिना क्षरस्य रस्त्वेव पा० । २ नपाठे भ्यानरशब्दवाच्यः इति वरपा० ॥ ३ गतिरूपने: ४ १ देहरूपं तद्भू
तयोनिः इति पा० ५ परिणामेन इति वरपा० ६ पुनः कर्म वर इति पा० ॥ एवमग्निर्वैश्वानर ७ अक्षरशब्दवाच्यं इ
ति वरपा० ८ प्रवेशेन इति पा० ॥ ९ रक्षाकारो इति पा० १० अत्राक्षरशब्दवाच्यं प्रधानं ११ एवाक्षरशब्दवाच्यः १२
अक्षरशब्दवाच्य इति वरपा० ॥ १३ यदुक्तं भूतयोनिः ॥ इति तस्य इति पा० इति वरपा० ॥

मिदं विज्ञातं भवति ॥ श्रुतिः तच्चान्यच्चैवं रूपं विशेषणं। तद्व्यपदेशाच्चेन प्रधानमक्षरं २२ ॥ अक्षरात्परतः
परः ॥ इति जीवाद्भेदव्यपदेशाच्च ॥ २३ ॥ ॥ अग्निर्मूर्धा चक्षुषी चंद्रसूर्यौ दिशः श्रोत्रे वाग्विवृता
श्च वेदाः । वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी ह्येष सर्वभूतांतरात्मा ॥ इत्यक्षरस्य १ त्रैलोक्य
रूपत्वमुपन्यस्यते अतश्च सकलात्मा परमेश्वर एवात्राक्षरपदाभिधेयः ॥ २४ ॥ ॥ प्राणाधारत्वे
न पूर्वमुपासनयोक्तस्य पुनर्जाठराग्निरूपेणोपासनमाह ॥ ॥ वैश्वानरः साधारणशब्दवि
शेषात् २५ ॥ ॥ यस्त्वेतमेवं प्रादेशमात्रमभिविदात्मानं वैश्वानरमुपास्ते । स सर्वेषु लोकेषु सर्वे
ष्वात्मस्वन्नमत्ति ॥ इत्यादि २ छांदोग्ये ५ स्य विषयः श्रूयते अत्रोपासनयोक्तो वैश्वानरः ३ परमेश्व
रो ऽन्यो वेति संदेहः । पूर्वपक्षन्यायेन तु वैश्वानरशब्देन जाठराग्निरुच्यते ॥ अयमग्निर्वैश्वानरो
येनेदमन्नं पच्यते । यदिदमद्यते । तस्यैष घोषो भवति । यमेतत्कर्णावपिधाय शृणोति । स यदोत्क्रामि

प्यनुभवति॥ नैनंदोषःश्रणोति॥ जाठराग्नेःप्रयोगदर्शनान्महाभूतस्तृतीयोऽग्निर्वास्यात्॥
एषवाऽग्निर्वैश्वानरः॥ इत्यादौ ४ वैश्वानरशब्दस्याग्नौ प्रसिद्धत्वादग्निर्देवतावास्यात्॥
वैश्वानरंद्वादशकपालंनिर्वपेत् पुत्रेजाते॥ इत्यादिष्विष्टिदेवतात्वेनफलदातृत्वश्रवणात्॥
नतुपरमेश्वरः ३ प्रादेशमात्रमितिपरिच्छेदावगमादिति॥ ॥अत्रोच्यते १॥ ॥परमेश्वर
एववैश्वानरः २ कथंवैश्वानरशब्दस्याग्नौसाधारण्ये अस्मिन्प्रकरणे॥ कोनआत्माकिंब्र
ह्मन्नात्मानमेवेमंवैश्वानरंसंप्रत्यध्येषि॥ तमेवनोब्रूहि॥ इत्यादिषुपरमेश्वरासाधारणब्र
ह्मशब्दादिभिर्विशेष्य ३ माणत्वान्नजाठराग्न्यादिषुतादृशविशेषणंसंभवति॥ अतःपरमेश्वर १८
एववैश्वानरः॥२५॥ ॥परमेश्वररूपेप्रमाणान्तरमाह॥ ॥स्मर्यमाणमनुमानंस्या
दिति २६॥ ॥अग्निर्मूर्धाचक्षुषीचन्द्रसूर्यौ॥ इत्यादिषुपरमेश्वरस्यद्युलोकादिपृथि

१ मूर्धेत्यादिनाक्षररस्यैवाइत्येवया० ३ नचावैश्वानरशब्दवाच्यः इतिवरपा०॥ २ यस्त्वेवंप्रादेशमात्र
मात्मानंवैश्वानरमुपा ४ ऽग्निरुच्यते॥ एषवाग्निर्वैश्व॰ ससर्वेषुलोकेष्वित्यादिकं इतिपा०॥
श्वानरइत्यादौ इतिपा०॥

व्यतरूपत्वमुक्तं॰ तदिह प्रत्यभिज्ञायमानं॰ तस्य परमेश्वरत्वे लिंगं॥२६॥ ॥शब्दादिभ्योंऽन्तः
प्रतिष्ठानान्नेति चेन्न तथा दृष्ट्युपदेशादसंभवात्पुरुषमपि चैनमधीयते २७ ✱ ॥न परमेश्व
र इति प्राप्तं॰ अत्रोच्यते इति पा॰॥२ तर इति सिद्धांतः॰॥३ प्रकरणे परमेश्वरासाधारणब्रह्मा
दिशब्दैर्विशेषण॰ इति पा॰॥४ तदित्थंभूतरूपमितीह॰ तस्य ह वा एतस्यात्मनो वैश्वानरस्य मू
र्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मा संदेहो बहुलो बस्तिरेव रयिः पृथिव्येव पादौ॰
इत्यत्र प्रत्यभिज्ञायमानं इति पा॰॥✱॥ ॥स एषोऽग्निर्वैश्वानरो हृदयं गार्हपत्यो मनोऽ
न्वाहार्यपचन आस्यमाहवनीयः॰ तद्यद्भक्तं प्रथममागच्छेत्तद्धोमीयं स यां प्रथमामाहुति
जुहुयात्॥ इत्यादिषु प्रतिपन्नेभ्योऽग्नित्रयप्रकल्पन प्राणाहुत्याधारादिभ्यः॰ स यो हैतमग्निं वै
श्वानरं पुरुषविधं पुरुषेऽन्तः प्रतिष्ठितं वेद॰ इति श्रुतात्पुरुषान्तःप्रतिष्ठितत्वलिंगाच्च जाठरोऽग्नि

श्रीकंठीय शैवभाष्यं १९ रेवनासौऽपरमेश्वर इति चेन्न । जठराग्निरूपतयोपास्यत्वेनोपदेशात्[२] । केवलस्य जाठराग्नेस्त्रै

लोक्यशरीरत्वाद्यसंभवाच्च । किंच । स एषोऽग्निर्वैश्वानरो यत्पुरुष ॥ इत्यनेन वैश्वानरस्य पुरुषत्वम

प्यधीयते वाजसनेयिनः । निरुपाधिकपुरुषशब्दवाच्यस्तु परमेश्वर एव । तेनेदं पूर्णं पुरुषे

ण सर्वम् । इति श्रवणात् । अतः परमेश्वर इति युक्तं ॥२७॥ ॥अत एव न देवताभूतं च ॥२८

यतोऽयं वैश्वानरस्त्रैलोक्यशरीरकः पुरुषशब्दवाच्यश्च अत एव न देवताग्निर्नेतरतीयभूतं वा

॥२८॥ ॥इह जाठराग्निरूपतयोपास्यत्वे सिद्धे परमेश्वरस्याग्निशब्दवाच्यत्वेन योजनाभेद १९

माचार्यान्तराणां दर्शयति ॥ ॥साक्षादप्यविरोधं जैमिनिः २९॥ ॥अवश्यमग्निरूपतयो

पास्यत्वादेवेदं[२] मग्निशब्दसामानाधिकरण्यं । अग्निनयनादियोगेन परमेश्वर एवाग्निशब्दस्य

साक्षाद्वृत्तित्वसंभवाद्वृत्तिसामानाधिकरण्याविरोधं जैमिनिरुवाच ॥२९॥ ॥अभिव्यक्ते

१ स एषोऽग्निर्वैश्वानरः ॥ इत्यग्निसामानाधिकरण्येन प्राणाहुत्याधारादिभ्यः पुरुषोऽन्तःप्रतिष्ठितमित्या

देश्च नासौ इति पा० ॥ २ त्वादेव इति पा० ॥

रित्याश्मरथ्यः ३० ॥ "यस्त्वेतमेवं प्रादेशमात्रं" इत्यपरिछिन्नस्य द्युप्रभृतिपृथिव्यंतप्रदेशं
संबंधिमात्रयापरिच्छिन्नत्वमुपासकाभिव्यक्तस्य इत्याश्मरथ्यमुनिः ॥ ३० ॥ ॥ अनुस्मृतेरि
तिबादरिः ३१ ॥ ॥ द्युप्रभृतिपृथिव्यंतस्य मूर्धादिपादांतान्वयत्वकल्पनमनुस्मृतये ब्रह्मप्रा
प्त्यर्थमितिबादरिः ॥ ३१ ॥ ॥ संपत्तेरितिजैमिनिस्तथाहिदर्शयति ३२ ॥ ॥ "उर एव वेदि
र्लोमानि बर्हिर्हृदयं गार्हपत्यो मनो ऽन्वाहार्यपचन आस्यमाहवनीयं" इत्युपासकस्योरः प्रभृती
नां वेद्यादित्वकल्पनं विभागभूतायाः प्राणाहुतेरग्निहोत्रत्वकल्पनार्थमिति जैमिनिः । तथा द
र्शयति च श्रुतिः । "अथ य एवं विद्वानग्निहोत्रं जुहोति" इति ॥ ३२ ॥ ॥ आमनंति चैन
मस्मिन् ३३ ॥ ॥ तैत्तरीया एनं परमेश्वरमस्मिन्नुपासकशरीरे प्राणाहुतिवेलायां भोक्तृत
या "शिवो माविशाप्रदाहाय" इति । "प्रभुः प्रीणाति विश्वभुक्" ॥ इति चामनंति । अतः सक
लाचार्यमतेन सर्वथा न्यायेन च जाठराग्निरूपेण परमेश्वर एवाराध्यः प्राणाग्निहोत्रेणेति समी

श्रीकंठीय चीर्नं॥२३॥ ॥इतिश्रीकंठशिवाचार्यविरचितेब्रह्ममीमांसाभाष्येप्रथमाध्यायस्यद्वितीयः
शैवभाष्यं॰ पादः॥२॥ ॥
२०

इतिव्यासस्त्रीयब्रह्ममीमासाशैवभाष्यस्यप्रथमाऽध्यायस्यद्विती
यपादःसमाप्तः॥ ॥शैवभाष्यंमुदेकाश्यांशिवस्यपरमात्मनः स
दाशिवेंद्रेणलेखिसतामस्त्वेतदोक्षितु॥१॥ समत १९४६ अश्विन